# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः –** साहित्यम् (अलङ्कारवर्गः) | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १६/०७/२०२१** | सन्दर्भग्रन्थः – कुवलयानन्दः (अर्थान्तरन्यासालङ्कारतः समाप्तिं यावत्) | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः ससन्दर्भं व्याख्यां कुरुत ।**

१ उक्तिरर्थान्तन्यासः स्यात् सामान्यविशेषयोः ।
हनूमानब्धिमतरद् दुष्करं किं महात्मनाम् ॥

२ वार्ये स्याद्वर्ण्यवृत्तान्तप्रतिबिम्बस्य वर्णनम् ।
ललितं निर्गते नीरे सेतुमेषा चिकीर्षति ॥

३ तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ।
पद्मरागायते नासामौक्तिकं तेऽधरत्विषा ॥

४ सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितम् ।
मयि पश्यति सा केशैः सीमन्तमणिमावृणोत् ॥

**प्रश्नः २** कुवलयानन्दग्रन्थकर्तुः जीवनकवनविषयकः परिचयः देयः ।

**प्रश्नः ३** कुवलयानन्दमनुसृत्य उल्लासालङ्कारं सोदाहरणं व्याख्यायत ।

**प्रश्नः ४** व्याजोक्त्यलङ्कारः सोदाहरणं विवेच्यताम् ।

**प्रश्नः ५** गूढोक्त्यलङ्कारं यथाग्रन्थं वर्णयत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः कारिकयोः सोदाहरणं व्याख्या कार्या ।**

१ छेकोक्तिर्यत्र लोकोक्तेः स्यादर्थान्तरगर्भिता ।
भुजङ्ग एव जानीते भुजङ्गाचरणं सखे ॥

२ निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनम् ।
ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान् ॥

३ त्वं हि नाम्नैव वरदो नाधत्से वरमुद्रिकाम् ।
न हि श्रुतिप्रसिद्धार्थे लिङ्गमाद्रियते बुधैः ॥
४ कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।
एति जीवन्तमानन्दो नरं वर्षशतादपि ॥

प्रश्नः ७ वक्रोक्त्यलङ्कारः सोदाहरणं विवृणुत ।

प्रश्नः ८ हेत्वलङ्कारं यथाग्रन्थं वर्णयत ।

प्रश्नः ९ अलङ्कारसंसृष्टिः भेद-प्रभेदपूर्वकं समीक्षताम् ।

प्रश्नः १० सङ्करालङ्कारं यथाग्रन्थं वर्णयत ।

प्रश्नः ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ कुवलयानन्दस्य रचयिता कः ?
२ पञ्चमी विद्या का ?
३ वेदस्य सप्तममङ्गं किम् ?
४ अप्पयदीक्षितेन कति ग्रन्थाः लिखिताः ?
५ 'क्व सूर्यप्रभवो वंशः ..... ॥' अत्र कः अलङ्कारः ?
६ आरोप्यमाणस्य प्रकृतोपयोगित्वे कः अलङ्कारः ?
७ 'अङ्गीकरोति यः काव्यं ..... ॥' पद्यमिदं कस्य ग्रन्थस्य ?
८ सम्भावनालङ्कारः कस्य सिद्धये ?
९ 'मेघैर्मेदुरमम्बरं ..... ॥' कस्मिन् ग्रन्थं पद्यमिदम् अस्ति ?
१० चातकः कं याचते ?
११ 'रात्रिर्गमिष्यति ...... ॥' श्लोकोऽयं कस्मिन् ग्रन्थे अस्ति ?
१२ अलङ्कारसम्प्रदायस्य आद्य आचार्यः कः ?
१३ अनुज्ञालङ्कारे दोषस्याभ्यर्थना कथम् ?
१४ 'यान्ति न्यायप्रवृत्तस्य ...... ॥' अत्र कः अलङ्कारः ?
१५ भूतभाव्यर्थसाक्षात्कारस्य वर्णनं कस्मिन् अलङ्कारे भवति ?

****